# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–शास्त्री-3(SEM-6) | **प्रश्नपत्रम्** - ८ | **गुणाः** - ७० |
| **विषयः** - पौरोहित्यम् | **कोड- CE- 3612** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ०८/०४/२०१९ | **सन्दर्भग्रन्थः**- छान्दोग्यब्राह्मणम्। | |

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

१ या अकृन्तन्नवयन् या अतन्वत याश्च देव्यो अन्तानभितो ततन्थ।
तास्त्वा देव्यो जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः॥

२ अर्यमणं नु देवं कन्या अग्निमयक्षत। स इमां देवो अर्यमा प्रेतो मुञ्चातु माऽमुतः स्वाहा॥

३ मम व्रते ते हृदं दधातु मम चित्तमनुचित्तं ते अस्तु।
मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्ति मह्यम्॥

**प्रश्नः २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ छान्दोग्यब्राह्मणे सायणभाष्यस्य किमस्ति वैशिष्ट्यं विवेचयत।

२ सप्रपदीक्रमविधिं विलिख्य आधुनिकसमाजे तस्यावश्यकतां प्रदर्शयत।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

१ अग्ने व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम्।
तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा॥

२ इमा मे विश्वातीवीर्यो भव इन्द्रश्च रक्षतम्। पूषस्त्वं पर्यावर्तयानष्टा आयन्तु नौ गृहान्॥

३ स्योनापृथिवी नो भवानृक्षरा निवेशनी। यच्छानः शर्म सप्रथो दैवान् मा भयादिति॥

**प्रश्नः ४ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ यथाशास्त्रं चूडाकरणसाधनभूतमन्त्राणां व्याख्यां कुरुत।

२ प्रथमप्रपाठकस्य षष्ठखण्डे आगतानां माणवकस्य अग्निस्तुतिपरकपञ्चमन्त्राणां विवेचनं कुरुत।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

१ यथा समुद्रं स्रवन्तीः समवयन्ति दिशो दिशः।
एवं मा सखायो ब्रह्मचारिणः समवयन्तु दिशोदिशः स्वाहा॥

२ यशोऽहं भवामि ब्राह्मणानां यशो विशाम्।
यशः सत्यस्य भवामि भवामि यशसां यशः॥

३ यथा समुद्रं स्रवन्तीः समवयन्ति दिशो दिशः।
एवं मा सखायो ब्रह्मचारिणः समवयन्तु दिशोदिशः स्वाहा॥

**प्रश्नः ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । १०**

१ छान्दोग्यब्राह्मणे द्वितीयप्रपाठके पञ्चमखण्डे प्रतिपादितं आदित्यदेवस्य महात्त्वं दर्शयत ।

२ यथाशास्त्रं द्वितीयप्रपाठकस्य चतुर्थखण्डे आगतानामग्निस्तुतिपरकमन्त्राणां विवेचनं कुरुत ।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ छान्दोग्यब्राह्मणस्य के सन्ति भाष्यकाराः?

२ छान्दोग्यब्राह्मणस्यापरं नाम किम्?

३ सप्तपदीकर्मणि का देवता?

४ ‘समञ्जन्तु’ इत्यस्य कोऽर्थः?

५ ‘अग्ने व्रतपते’ इति मन्त्रेण माणवकः किं करोति?

६ ‘सुश्रवाः’ इत्यस्य कोऽर्थः?

७ ‘जातवेदः’ इत्यस्य कोऽर्थः?

८ ‘राका’ इत्यस्य कोऽर्थः?

९ के सन्ति त्रयो धर्मस्कन्धाः?

१० का सिनीवाली?

११ छान्दोग्यब्राह्मणे कति प्रपाठकाः?

१२ ‘साम्राज्ञी श्वशुरे भव’ - इति मन्त्रविशेषः कुत्र श्रूयते?

१३ ‘ऋषीणां पुत्रो अधिराज एषः’ इत्यत्र कः ज्ञायते?

१४ सप्तपद्यां द्वितीयपदस्य फलं किम्?

१५ ‘ऋतम्’ इति शब्दस्य कोऽर्थः?

०००